Total Pages – 06 RNLKWC/P.G./Sanskrit/SAN404/SEM-IV/24

**SANSKRIT (P.G.)**

**(CBCS)**

**M.A. Fourth Semester End Examination-2024**

**(Regular & Supplementary Paper)**

**PAPER - SAN-404**

***Full Marks : 40*** ***Time : 2 hours***

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

**PAPER - SAN-404B**

**[सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः]**

**A. यथाकामं प्रश्नचतुष्टयं समाधत्त।** 2×4=8

1. 'बुद्धचरितस्य प्रथमसर्गस्य नाम किम्? सिद्धार्थस्य जन्म कुत्रासीत्?

2. बुद्धचरितस्य मुख्यः रसः कोऽस्ति? अश्वघोषः वस्तुतः कः आसीत्?

3. महर्षिः असितः किमर्थं शाक्याधिपतिसकाशमुपस्थापितवान्?

4. हर्षचरितम् इति काव्य केन विरचितम्? तस्य कवेः अपर गद्यकाव्यमेकं लेख्यम्।

(Turn Over)

5. हर्षवर्धन: कियद् दूरं यावद् राज्यवर्धनम् अनुससार? अनुसरणान्ते कुत्र किमर्थञ्च स कालम् अयापत्?

6. हर्ष: राज्यस्य पथि व्रजन् कीदृशं द्राविडम् आन्ध्रं च ददर्श?

**B. यथानिर्देशं समाधत्त।** **4×2=8**

**क) यथेच्छं द्वौ व्याखात।**

(i) दु:खार्णवाद्व्याधिविकीर्णफेनाज्जरातरङ्गान्मरणोग्रवेगात्।
उत्तारयिष्यत्ययमुह्यमानमार्तं जगज्ज्ञानमहाप्लवेन॥

(ii) तृष्णार्गलं मोहतम: कपाटं द्वारं प्रजानामपयान-हेतो:।
विपाटयिष्यत्यमुत्तमेन सद्धर्मताडेन दुरासदेन॥

(iii) सारस्वतश्चापि जगाद नष्टं वेदं पुनर्यं ददृशुर्न पूर्वे।
व्यासस्तथैनं बहुधा चकार न यं वसिष्ठ: कृतवानशक्ति:॥

**ख) यथेच्छं द्वौ उत्तरत।** **4×2=8**

(i) वत्स जानामि त्वां पितृप्रियम् अतिमृदुहृदयम्।
ईदृशेषु विधुरयति धीमतोपि धियम्।





अतिदुर्धरो बान्धवस्नेह: सर्वप्रमाथी।
अतो नार्हसि आत्मानं शुचे दातुम्।

(ii) मातापितृसहस्राणि पुत्रदारशतानि च।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान्॥

(iii) नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दु:खम्।
कृत्वालोकं तरला तडिदिव वज्रं निपातयति॥

**C. यथानिर्देशं उत्तरत।** **8×2=16**

क) कुमारजन्मवृत्तान्त: यथोलोचितमुपवर्ण्यताम्।

अथवा,

'बुद्धचरितम्' इति महाकाव्यस्य प्रथमसर्गस्य सारांशमालोच्यताम्।

ख) को हर्षवर्धन:? स्कन्धावार-प्रत्यावर्त्तनकाले किमवस्थं राज्यं सोऽपश्यत्?

अथवा

महाकवि-बाणस्य रचनानैपुण्यं स्वभाषया प्रतिपादनीयम्।

## PAPER - SAN-404C

[संस्कृतभाषया देवनागरीलिप्या च समाधेया:]

**A. यथाकामं प्रश्नचतुष्टयं समाधेया:।** **2×4=8**

१. क: पञ्चम्यर्थ: ? अपादानं कतिविधम् ?

२. वैयाकरणमते प्रादयो निपाता द्योतका वा ? विरोधार्थकस्य नञ: उदाहरणं दीयताम्।

३. सामर्थ्यं कतिविधम् ? कानि च तानि ?

४. ''धर्मजिज्ञासा'' इत्यत्र किं विग्रहवाक्यम् ? जिज्ञासापदस्य कोऽर्थ: ?

५. के दर्शनहेतव: ? भाष्योक्त: श्लोक: लेख्य:।

६. प्रकृतिपुरुषयो: चत्वार: वैधर्म्या: लेख्या:।

**B. एकस्य व्याख्या कार्या।** **4×1=4**

१. वर्णस्फोट:।

२. द्वितीयार्थ:।





**C. यथेच्छं त्रयाणां व्याख्या कार्या।** **4×3=12**

१. धर्मलक्षणम्।

२. वाक्यभेददोष:।

३. सांख्यप्रशस्ति:।

४. ''यत्पर: शब्द: स शब्दार्थ:'' इति न्याय: व्याख्येय:।

५. ''व्यावहारिकपारमार्थिकरूपविषयभेदेन गतार्थत्वविरोधयोरभावात्'' इति भाष्यतात्पर्यं व्याख्येयम्।

**D. यथानिर्देशं समाधेयम्।** **8×2=16**

क. समासशक्तिं निरूपयत।

अथवा

स्फोटविभागान् समुल्लिख्य वाक्यस्फोटं वर्णयत।

ख. पूर्वपक्षमतखण्डनपूर्वकम् ''अथातो धर्मजिज्ञासा'' इति सूत्रोक्तस्य अथशब्दस्य भाष्यदिशा अर्थ: निरूपणीय:।

अथवा

सूत्रभाष्यलिखनात्प्राक् विज्ञानभिक्षुणा भूमिकाभागे यत् तत्त्वं प्रतिष्ठापयितुं प्रयतितं तद् आलोचनीयम्।